COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

# वक्रोक्तिरलंकारः

वक्र उक्तिः=वक्रोक्तिः,अस्य अलंकारस्य संज्ञाप्रसङ्गे मम्मटाचार्येण तस्य काव्यप्रकाशग्रन्थस्य नवमोल्लासे उक्तम्-

"यदुक्तमन्यथा वाक्यमन्यथाऽन्येन योज्यते।

श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा"।।

एकेन वक्त्रा अन्येन अभिप्रायेण उक्तं यत् वाक्यम् अन्येन श्रोत्रा तदेव वाक्यं श्लेषेण काक्वा वा अन्यार्थकतया योज्यते सा वक्रोक्तिः।अर्थात् एकेन अन्याभिप्रायेण उक्तं वाक्यम् अन्येन श्रोत्रा यदि अन्याभिप्रायं कल्प्यते तदा वक्रोक्तिरलंकारो भवति इति तात्पर्यम्।सा एव वक्रोक्तिः द्विधा विभज्यते-

**(१)श्लेषवक्रोक्तिः**

**(२)काकुवक्रोक्तिश्च**

'अन्येन' इति उक्त्या अपह्नुतौ नातिव्याप्तिः,अपह्नुतौ स्वोक्ते स्वयमेव अन्यथाकरणादिति।श्लेषस्य सभङ्गाभङ्गरुपेण द्विविधत्वात् श्लेषवक्रोक्तिरपि द्विविधा।तत्र सभङ्गपदश्लेषेण वक्रोक्तिर्यथा-

"नारीणामानुकूलमाचरसि चेज्जानासि कश्चेतनो।

वामानां प्रियमादधाति हितकृन्नैवाऽबलानां भवान्।।

युक्तं किं हितकर्तनं ननु वलाभावप्रसिद्धात्मनः।

सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः"।।

**COMPILED & CIRCULATED BY**
TUMPA JANA(ASSISTANT PROFESSOR)
**DEPT. OF SANSKRIT**
**NARAJOLE RAJ COLLEGE**

अत्र वक्रोक्तिरलंकारः स्यात् ,वक्त्रा अन्येन अभिप्रायेन उक्तस्य वाक्यस्य श्रोत्रा अन्यार्थकतया योजितत्वात्।यथाऽत्र नारीणाम् इति पदं कामिनीपरतया वक्त्रा उक्तम्,परन्तु प्रतिवक्त्रा 'न अरीणाम्' इत्यर्थपरतया योजितम्।एवम् अग्रे अपि।नारीणाम् इत्यादिपदानां द्व्यर्थकत्वात् सर्वत्र श्लेषः।एवं श्लेषमूलिका वक्रोक्तिरियम्।काव्यप्रकाशविस्तारिकाटीकायाम् अपि उक्तम्-"नारीणामित्यादि।नारीणां स्त्रीणाम् अनुकूलमाचरसि,यदि जानासि विज्ञोऽसि।विज्ञ एव स्त्रीणामनुकूल इत्यर्थः।तेन नार्यभिप्रायकमिदं वचनं विपक्षाभिप्रायकेण वामानाम् इत्यनेन योषिदभिप्रायेण अवलानाम् इत्यनेन तत्पुनरोजोभावतात्पर्यकेण वलाभावेत्यनेन तदपि वलपदस्यासुरत्वेन पुरन्दरपदेन अन्यथा योजितम्।नारीणामिति स्त्रीणां पदं भागम्,न वैरिणाम्,अभावस्यावबोधनात् श्लेषः।वामाः स्त्रियो विपक्षाश्च।हितकृदिति करोतिकृन्तत्यो रुपम्।अबलाः स्त्रियो वलशून्याः।बलमोजो वलोऽसुरभेदश्च।अत्र नारीणामिति पदमुपजीव्य प्रदत्तानां श्लेषान्तराणाम्,स एव मूलमिति तेनैव व्यवहारः"।

यद्यपि वामादिपदे न भङ्गस्तथापि नारीणाम् इति पदभङ्गम् उपजीव्य प्रवृत्तानां श्लेषान्तराणां स एव मूलमिति तेनैव व्यवहारः।अभङ्गश्लेषेण वक्रोक्तिर्यथा-

"अहो केनेदृशी बुद्धिर्दारुणा तव निर्मिता।

त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्"।।

अत्र 'दारुणा' इति पदं 'क्रूरः' इत्यर्थकतया वक्त्रा प्रोक्तम्, 'काष्ठेन' इत्यर्थपरतया च श्रोत्रा योजितम्।अत्र दारुणा-क्रूरा,काष्ठेन इति उभयार्थपक्षेऽपि 'दारुणा' इति पदस्य न भङ्गः।अतः अत्र अभङ्गपदश्लेषेण वक्रोक्तिरयम्।काव्यप्रकाशविस्तारिकाटीकायाम् उक्तम्-"अहो इत्यादि।दारुणा हिंस्रा काष्ठेनेति च।सूक्ष्मग्राहित्वमाशुग्राहित्वं गृहीतग्राहित्वं वेति गुणत्रयम्।धान्येन धनवानित्यत्रेव तृतीयाया अभेद एवार्थ इत्याह-दारुमयीति"।

द्वितीया वक्रोक्तिः यथा काकुवक्रोक्तिः।अस्याः उदाहरणं यथा-

"गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम्।

अलिकुलकोकिलललिते नैष्यति सखि सुरभिसमयेऽसौ"।।

COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

अत्र नैष्यतीति निषेधस्य अभिप्रायेन नायिकया उक्तम्।पुनः तदेव उत्तरम् अन्यसख्या तु न एष्यति ?अपि तु एष्यत्येवेत्यर्थतया काक्वा-ध्वनिकारेण योज्यते।अतः अत्र काकुवक्रोक्ति इयम्।अत्र काकोः शब्दधर्मतया शब्दालंकारता अन्यथा योजनं च व्यञ्जनयेति।काव्यप्रकाशविस्तारिकाटीकाकारेणापि एवमेव उक्तम्-"गुरुजनपरतन्त्रेति।प्रवारां जिगमिषौ नायके नायिकायाः सख्याश्च वचनप्रतिवचने।देशं विषयान्तरम्,न तु ग्रामम्।सुरभिसमये वसन्तकाले।अत्र नैष्यतीत्यनागमनाभिप्रायेण नायिकयाभिहितम्।न एष्यति, अपि तु तथेति ध्वनिविकारेणागमने सख्या योजितम्"।

एवमेव मम्मटाचार्येण वक्रोक्तिरलंकारस्य संज्ञा उदाहरणं च आलोचितम्।।

Ref.-

(1)কাব্যপ্রকাশ(নবম ও দশম উল্লাস)।

(2)काव्यप्रकाशरहस्यम्